1. “चेर-पाण्ड्य लिपिः” अनेन नाम्ना प्रसिद्ः।

(A) तमिल
(B) वट्टेलुत्तु
(C) कोलेलुत्तु
(D) ग्रन्थलिपि
(E) उत्तरं न ज्ञायते

2. चन्द्रगुप्तद्वितीयस्य मथुराशिलालेखः कया भाषया लिखिता

(A) संस्कृतम्
(B) प्राकृतम्
(C) पालिः
(D) द्रविड्भाषा
(E) उत्तरं न ज्ञायते

3. “श्रुत्वा” इति पदं रोमन् लिप्यां कथं लिख्यते।

(A) Shrutva
(B) S'ṛtvā
(C) Srtva
(D) Sritvā
(E) उत्तरं न ज्ञायते

4. नागराक्षराणां सैद्धान्तिकः पूर्णविकासः – कदा सम्पन्नः?

(A) 1000 C.E.
(B) 1100 C.E.
(C) 1200 C.E.
(D) 1300 C.E.
(E) उत्तरं न ज्ञायते

5. देवनागरी लिपेः सुस्पष्ट लेखनारम्भः कस्यराज्ञः कालात् दृश्यते।

(A) सन्तिवर्मन् अथवा दन्तिदुर्ग द्वितीयः।
(B) रन्तिवर्मन् कालात्।
(C) रविवर्मा।
(D) हर्षवर्द्धनः।
(E) उत्तरं न ज्ञायते

6. शिरोमय ब्राह्मीलिपि कालः कः?

(A) ई. पूर्वं 200 तः 200 ईसा यावत्।

(B) 200 ख्रीष्टाब्द तः 400 ख्रीष्टाब्दयावत्।

(C) ई. पूर्वं 400 तः 100 ख्रीष्टाब्द यावत्।

(D) 400 ख्रीष्टाब्द तः आरभ्य 500 ख्रीष्टाब्द यावत्।

(E) उत्तरं न ज्ञायते

7. "" इदं पादं कथं पठ्यते?

(A) शाखा (B) भार्या

(C) वाचा (D) बाला

(E) उत्तरं न ज्ञायते

8. मातृकाग्रन्थानां रक्षणाय इदानीन्तन नूतन माध्यमं किम्?

(A) ध्वनिमुद्रणम्

(B) छायाग्रहणम्

(C) पी.डी.एफ् (Portable Documentation Format)

(D) पुनर्मुद्रणम्

(E) उत्तरं न ज्ञायते

9. अभिलेखेषु "प" इत्यस्य संक्षेपरूपं किं द्योतयति?

(A) पर्णं (B) पत्रं

(C) पृष्ठं (D) पक्षं

(E) उत्तरं न ज्ञायते

10. समुद्रगुप्तस्य प्रयागस्तम्भलेखस्य कालः कः?

(A) 300 ई.
(B) 320 ई.
(C) 350 ई.
(D) 380 ई.
(E) उत्तरं न ज्ञायते

11. तान्त्रिक अभिलेखानां मुख्यः अंशः अथं भवति

(A) तन्त्रम्
(B) मुद्रा
(C) व्यापारः
(D) ताम्रं
(E) उत्तरं न ज्ञायते

12. कैथी लिप्यां 'सप्त' इति संख्या एवं भवति

(A) १
(B) २
(C) ७
(D) ६
(E) उत्तरं न ज्ञायते

13. 'देवानांप्रिय' इति शिलालेखेषु यत् दृश्यते तत् कं उल्लेखयति?

(A) चन्द्रगुप्तं
(B) समुद्रगुप्तं
(C) अशोकं
(D) चन्द्रगुप्तद्वितीयं
(E) उत्तरं न ज्ञायते

14. अत्र मांगलिक-चिन्हेषु किं न युज्यते -

(A) स्वस्तिकः
(B) बोधिवृक्षः
(C) गोलाकारः
(D) धर्मचक्रम्
(E) उत्तरं न ज्ञायते

15. सर्वकारीयः लेखकः केन शब्देन अवबुध्यते?

(A) कर्मस्थः
(B) कर्मकरः
(C) कायस्थः
(D) कर्मी
(E) उत्तरं न ज्ञायते

16. आवलीतः अनुचितं निष्कास्यताम् -

(A) छेदपटि
(B) छिवढि
(C) शृपाटिका
(D) चीरिका
(E) उत्तरं न ज्ञायते

17. "शनपत्र" इत्युक्ते - किं द्योतयति?

(A) भूर्जपत्र
(B) तालपत्र
(C) 'पेपर' (आङ्गलभाषायां)
(D) पटः
(E) उत्तरं न ज्ञायते

18. प्राचीन-अभिलेखेषु तिथि-अंकन-विधेः आवली भवति

(क) मास
(ख) तिथि
(ग) पक्ष
(घ) संवतः नाम
(ङ) वर्ष संख्या

(A) ग - क - ङ - घ - ख
(B) ख - ङ - घ - क - ग
(C) घ - ङ - क - ग - ख
(D) ङ - घ - क - ग - ख
(E) उत्तरं न ज्ञायते

19. "Citation" इत्यस्य पारिभाषिक संस्कृतपदं किम्?

(A) उपक्रमः
(B) अधिकरणम्
(C) उद्धरणम्
(D) उपादानम्
(E) उत्तरं न ज्ञायते

20. कानिष्कस्य सारनाथ बौद्धप्रतिमालेखः इतः प्राप्तः

(A) दिल्लीतः
(B) वाराणासीतः
(C) कान्धारतः
(D) गिरनारतः
(E) उत्तरं न ज्ञायते

21. मालविकाग्निमित्रे नायकः कः?

(A) अग्निमित्रः
(B) दुष्यन्तः
(C) गणदासः
(D) हरदत्तः
(E) उत्तरं न ज्ञायते

22. साहित्य शास्त्रे कति रूपकाणि भवन्ति

(A) नव
(B) सप्त
(C) द्वादश
(D) दश
(E) उत्तरं न ज्ञायते

23. पुत्रिका नाटकस्य नामान्तरं किम्?

(A) स्थापकसरवानाटकम्
(B) पाञ्चालिका नाटकम्
(C) गौडीयानाटकम्
(D) चोलीयनाटकम्
(E) उत्तरं न ज्ञायते

24. मीमांसकमण्डले भवभूतिकवेः नामान्तरम् किम् ?

(A) श्रीकण्ठः

(B) उन्वेकभट्टः

(C) यज्ञपालदेवः

(D) भट्टगोपालः

(E) उत्तरं न ज्ञायते

25. महाभाष्ये उल्लिखितम् नाटकद्वयम् इदम् भवति

(A) बलिबन्धः, रावणवधः च

(B) रावणवधः, शिशुपालवधः च

(C) कंसवधः, बलिबन्धः, च

(D) कंसवधः, रावणवधः च

(E) उत्तरं न ज्ञायते

26. हर्षवर्धनस्य नाटकद्वयं भवति

(A) हर्षचरितम्, सौन्दरानन्दम्

(B) रत्नावली, प्रियदर्शिका

(C) वेणीसंहारः, मृच्छकटिकम्

(D) श्रृंङ्गारतिलकं, समुद्रमथनम्

(E) उत्तरं न ज्ञायते

27. ————— इदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषम् ?

(A) देवतानाम्

(B) देवानाम्

(C) वेदानाम्

(D) ऋषीणाम्

(E) उत्तरं न ज्ञायते

28. दूतवाक्याख्ये रूपके कः दौत्यमावहति ?

(A) विदुरः

(B) सुयोधनः

(C) उद्धवः

(D) वासुदेवः

(E) उत्तरं न ज्ञायते

29. शाकुन्तले दुर्वाससः शापः भवति नदित अविमारके कस्य शापः दृश्यते ?

(A) विष्णुसेनस्य
(B) चण्डभार्गवस्य
(C) मायाविनः
(D) कुन्तिभोजस्य
(E) उत्तरं न ज्ञायते

30. नाटकस्य आमुखे कः मुख्यभाषकः भवति ?

(A) नटः
(B) विदूषकः
(C) सूत्रधारः
(D) नायकः
(E) उत्तरं न ज्ञायते

31. "रक्षितव्या खलु प्रकृतिपेलवा प्रियसखी" ———— अत्र "प्रियसखी" कां सूचयति ?

(A) प्रियंवदां
(B) अनसूयां
(C) शकुन्तलां
(D) मेनकां
(E) उत्तरं न ज्ञायते

32. "हिडिम्बायाः" कथापात्रम् कस्मिन् रूपके वर्तते ?

(A) कर्णभारे
(B) दूतघटोत्कचे
(C) दूतवाक्ये
(D) मध्यव्यायोगे
(E) उत्तरं न ज्ञायते

33. कण्वस्य आश्रमः कुत्र वर्तते ?

(A) मन्दाकिनीतीरे
(B) यमुनातीरे
(C) गङ्गातीरे
(D) मालिनीतीरे
(E) उत्तरं न ज्ञायते

34. अभिज्ञानशाकुन्तले विदूषकस्य नाम भवति

(A) माणवकः
(B) माढव्यः
(C) सहदेवः
(D) वैशाखः
(E) उत्तरं न ज्ञायते

35. कश्मीरीय राज्ञां विषये अयं कविः उत्कृष्टतया काव्यं रचितवात् अस्ति

(A) कल्हणः
(B) जल्हणः
(C) बिल्हणः
(D) प्रवरसेनः
(E) उत्तरं न ज्ञायते

36. सङ्कल्पसूर्योदये (कथा) नायकः कः?

(A) मोहः।
(B) विवेकः।
(C) डम्भः।
(D) क्रोधः।
(E) उत्तरं न ज्ञायते

37. विशाखदत्तः कया रीत्या मुद्राराक्षस - नाटकं लिलेख?

(A) गौड्या
(B) वैदर्भ्या
(C) पाञ्चाल्या
(D) मागधी
(E) उत्तरं न ज्ञायते

38. भवभूतेः यथार्थनाम अयं वर्तते -

(A) भारविः
(B) कालिदासः
(C) नीलकण्ठः
(D) श्रीकण्ठः
(E) उत्तरं न ज्ञायते

39. मत्तविलासप्रहसने अस्य नगरस्य वर्णनं उत्कृष्टमस्ति?

(A) काशी
(B) काञ्ची
(C) अवन्तिका
(D) द्वारका
(E) उत्तरं न ज्ञायते

40. महावीरचरितम् इदं आधारीकृत्य वर्तते

(A) रामायणम्
(B) महाभारतम्
(C) महावीरं
(D) वायुपुराणम्
(E) उत्तरं न ज्ञायते

41. सुशिक्षित चार्वाकमते आत्मा

(A) अस्ति, परन्तु न नित्यः।
(B) शरीराद् भिन्नो नास्ति।
(C) शरीराद् भिन्नः अस्ति।
(D) मन एव आत्मा।
(E) उत्तरं न ज्ञायते

42. सांख्यदर्शने प्रकृतिर्नाम

(A) सृष्टेः पूर्वावस्था
(B) स्वभावः
(C) माया
(D) उपादानाम्
(E) उत्तरं न ज्ञायते

43. गौतम बुद्धस्य पिता

(A) शुद्धोदनः
(B) शाक्यसिंहः
(C) कपिलः
(D) गौतमः
(E) उत्तरं न ज्ञायते

44. षट् पदार्थाः इति कस्मिन् दर्शने ?

(A) वैशेषिकदर्शने

(B) न्यायदर्शने

(C) बौद्धदर्शने

(D) जैनदर्शने

(E) उत्तरं न ज्ञायते

45. अन्नम्भट्टानुसारेण कतिविधाः सन्निकर्षाः ?

(A) पञ्चविधः

(B) चतुर्विधः

(C) षड्विधः

(D) नवविधः

(E) उत्तरं न ज्ञायते

46. शून्यं जगत् इति के वदन्ति ?

(A) बौद्धाः

(B) जैनाः

(C) चार्वाकाः

(D) सांख्याः

(E) उत्तरं न ज्ञायते

47. योगशास्त्रे पुरुषो भवति

(A) अजडः

(B) जडः

(C) जडादजडः

(D) निर्जडः

(E) उत्तरं न ज्ञायते

48. अद्वैतवेदान्ते प्रमाणानि अङ्गीक्रियन्ते

(A) त्रीणि

(B) षट्

(C) पञ्च

(D) सप्त

(E) उत्तरं न ज्ञायते

49. “स्मृतिरूपः परत्र पूर्वदृष्टावभासः” इति लक्षणमस्ति

(A) जीवस्य

(B) ब्रह्मणः

(C) अध्यासस्य

(D) मायायाः

(E) उत्तरं न ज्ञायते

50. असतः सज्जायत इति कस्य पक्षः

(A) बौद्धस्य

(B) जैनस्य

(C) सांख्यस्य

(D) प्राभाकरस्य

(E) उत्तरं न ज्ञायते

51. शून्यवादः कस्य सिद्धान्तः ?

(A) बौद्धस्य

(B) जैनस्य

(C) चार्वाकस्य

(D) वैशेषिकस्य

(E) उत्तरं न ज्ञायते

52. सर्वशून्यत्ववादी अस्ति

(A) माध्यमिकः

(B) वैभाषिकः

(C) सौत्रान्तिकः

(D) योगाचारः

(E) उत्तरं न ज्ञायते

53. अनुबन्धचतुष्टये एतत् नास्ति

(A) अधिकारी

(B) जिज्ञासा

(C) प्रयोजनम्

(D) विषयः

(E) उत्तरं न ज्ञायते

54. नास्तिकाः इति कथ्यन्ते

(A) ईश्वरो नास्ति इति कथनात्

(B) वेदः प्रमाणं नास्ति इति कथनात्

(C) प्रपञ्चस्य मिथ्यात्वकथनात्

(D) मोक्षः नास्ति इति कथनात्

(E) उत्तरं न ज्ञायते

55. अत्र बोधात्मको भवति

(A) जीवः

(B) आत्मा

(C) अजीवः

(D) पुरुषः

(E) उत्तरं न ज्ञायते

56. अख्यातिवादः कस्य पक्षः ?

(A) मीमांसकस्य

(B) नैयायिकस्य

(C) सांख्यस्य

(D) बौद्धस्य

(E) उत्तरं न ज्ञायते

57. शाबरभाष्ये प्रथमाध्यांये अयं पादः तर्कपाद इति व्यवह्रियते

(A) प्रथमः

(B) द्वितीयः

(C) तृतीयः

(D) चतुर्थः

(E) उत्तरं न ज्ञायते

58. ———— इति क्रियायाः प्रवर्तकं वचनमाहुः

(A) चोदना

(B) साधना

(C) लक्षणा

(D) मीमांसा

(E) उत्तरं न ज्ञायते

59. विवेकख्यातिरूपस्य संयोगस्य कारणम् भवति

(A) अविद्या
(B) मोहः
(C) कामः
(D) अज्ञानम्
(E) उत्तरं न ज्ञायते

60. जैमिनिसूत्रे धर्मलक्षणमस्ति

(A) चोदनालक्षणोऽर्थो धर्मः
(B) वेदः एव धर्मः
(C) कर्म एव धर्मः
(D) पुण्यपदवाच्यः धर्मः
(E) उत्तरं न ज्ञायते

61. संप्रति भारतभूमेः उत्तरपूर्वभागे का नाम शाखा प्राचुर्येण वर्तते?

(A) वाजसनेय शाखा
(B) तैत्तिरीयशाखा
(C) राणायणीय शाखा
(D) कठशाखा
(E) उत्तरं न ज्ञायते

62. कौथुमशाखा कस्य वेदस्य शाखा भवति?

(A) कृष्णयुजुर्वेदस्य
(B) सामवेदस्य
(C) अथर्वणवेदस्य
(D) ऋग्वेदस्य
(E) उत्तरं न ज्ञायते

63. असुर शब्दः ऋग्वेदे ———— वाचकत्तेन प्रयुक्तः भवति?

(A) शत्रु
(B) मित्र
(C) देवता
(D) यजमान
(E) उत्तरं न ज्ञायते

64. पुराणेषु ऋग्वेदस्य कति शाखाः परिगण्यन्ते?

(A) शाखात्रयम्
(B) शाखापञ्चकम्
(C) शाखाचतुष्टयम्
(D) शाखाषट्कम्
(E) उत्तरं न ज्ञायते

65. वेदशब्दः शक्त्या किं सूचयति?

(A) ज्ञानम्
(B) प्रज्ञानम्
(C) देवतारूपम्
(D) मन्त्ररूपम्
(E) उत्तरं न ज्ञायते

66. अथर्ववेदसंहितायां कति काण्डानि भवन्ति?

(A) विशंतिः
(B) द्वाविंशतिः
(C) दश
(D) चतुर्दश
(E) उत्तरं न ज्ञायते

67. हिरण्यगर्भसूक्तस्य छन्दः किम्?

(A) अनुब्टुप्।
(B) जगति।
(C) त्रिब्टुप्।
(D) आर्या।
(E) उत्तरं न ज्ञायते

68. कौथुमीयशाखाधारितः वेदः –

(A) यजुर्वेदः।
(B) ऋक्वेदः।
(C) सामवेदः।
(D) अथर्ववेदः।
(E) उत्तरं न ज्ञायते

69. —————— धातोः निष्पन्नः वेद शब्दः।

(A) पद्लगतौ।
(B) गदव्यक्तायां वाचि।
(C) विद-ज्ञाने।
(D) भू सन्तायां।
(E) उत्तरं न ज्ञायते

70. उद्गीतापासना कस्यामुपनिषदि प्रतिपादिता वर्तते -

(A) छान्दोग्योपनिषदि।
(B) बृहदारण्यकोपनिषदि।
(C) ईशावास्योपनिषदि।
(D) मुण्डकोपनिषदि।
(E) उत्तरं न ज्ञायते

71. कठोपनिषदि प्रन्यध्यायं कति क्लयः सन्ति?

(A) पञ्च।
(B) दश।
(C) सप्त।
(D) तिस्तः।
(E) उत्तरं न ज्ञायते

72. तैत्तरीयारण्यकस्य केषां खाण्डानां सम्मिलितमभिधानं तैत्तरीयोपनिषद् शति कथ्यते -

(A) सप्तम - अष्टम - नवम।
(B) पञ्चम - षष्ठ - सप्तम।
(C) दशम - एकादशतम - द्वादशतम।
(D) प्रथम - द्वितीय - तृतीय।
(E) उत्तरं न ज्ञायते

73. प्रश्नोपनिषदि कति प्रश्नाः सन्ति?

(A) अवयै।
(B) षट्।
(C) सप्त।
(D) नव।
(E) उत्तरं न ज्ञायते

74. "उपनिषद्" श्म्यत्र "नि" शब्दार्थः कः ?

(A) नितरां।

(B) निश्चयः।

(C) निब्कलं।

(D) निचयः।

(E) उत्तरं न ज्ञायते

75. वेदाङ्गे आर्चज्योतिषे श्लोकाः सन्ति

(A) 24

(B) 36

(C) 38

(D) 41

(E) उत्तरं न ज्ञायते

76. पिङ्गलछन्दःशास्त्रस्य आदिमं सूत्रमस्ति

(A) वसुधास्

(B) कागुहार्

(C) वरा साय्

(D) धीश्रीस्त्रीम्

(E) उत्तरं न ज्ञायते

77. वेदाङ्गानि कति भवन्ति ?

(A) चत्वारि

(B) सप्त

(C) षट्

(D) अष्टौ

(E) उत्तरं न ज्ञायते

78. वेदाङ्गज्यौतिषकर्ता अस्ति

(A) मगधः

(B) लगधः

(C) पिङ्गलः

(D) याज्ञवल्क्यः

(E) उत्तरं न ज्ञायते

79. कालज्ञानमिति अपरं नाम भवति

(A) ज्योतिषस्य (B) छन्दसः

(C) व्याकरणस्य (D) शिक्षायाः

(E) उत्तरं न ज्ञायते

80. धातु संज्ञाविधायकं सूत्रमस्ति

(A) धातोस्तन्निमित्तस्यैव (B) धातोः

(C) भूवादयो धातवः (D) धातोः कर्मणः समानकर्तृकादिच्छायां वा

(E) उत्तरं न ज्ञायते

81. अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। इदं ——————— आदिमं श्लोकार्धमस्ति।

(A) अष्टाध्याय्याः (B) महाभाष्यस्य

(C) वाक्यपदीयस्य (D) भूषणसारस्य

(E) उत्तरं न ज्ञायते

82. ''केऽणः'' इति सूत्रेण के परे अणः ——————— विधीयते।

(A) दीर्घः (B) ह्रस्वः

(C) लोपः (D) एत्वम्

(E) उत्तरं न ज्ञायते

83. पाणिनिकर्तृकं काव्यमस्ति

(A) कृष्णविजयम् (B) नैषधम्

(C) जाम्बवतीहरणम् (D) श्रीकण्ठचरितम्

(E) उत्तरं न ज्ञायते

84. कात्यायनः अस्ति

(A) व्याकरणभाष्यकारः
(B) व्याकरणसूत्रकारः
(C) व्याकरणवार्त्तिककारः
(D) वेदान्तसूत्रकारः
(E) उत्तरं न ज्ञायते

85. ह्रस्वस्य अवर्णस्य प्रक्रियादशायां कः प्रयत्नः भवति?

(A) संवृतम्
(B) स्पृष्टम्
(C) विवृतम्
(D) ईषत्स्पृष्टम्
(E) उत्तरं न ज्ञायते

86. शिवेहि इत्यत्र पररूपविधायकं सूत्रं किम्?

(A) एङिपररूपम्
(B) अन्तादिवच्च
(C) ओमाङोश्च
(D) आद्गुणः
(E) उत्तरं न ज्ञायते

87. सर्वत्र शाकल्यस्य इति सूत्रेण किं कार्यं विधीयते?

(A) दीर्घकार्यम्
(B) द्वित्वकार्यम्
(C) द्वित्वनिषेधकार्यम्
(D) समासः
(E) उत्तरं न ज्ञायते

88. वृद्धिसंज्ञाविधायकं सूत्रं किम्?

(A) वृद्धिरेचि
(B) वृद्धिरादैच्
(C) वा सुप्यापिशले
(D) अचो ञ्णिति च
(E) उत्तरं न ज्ञायते

89. ‘‘नाज्झलौ’’ इति निषेधः भवति

(A) टिसंज्ञायाः
(B) सवर्णग्रहणस्य
(C) सवर्णसंज्ञायाः
(D) इत्संज्ञायाः
(E) उत्तरं न ज्ञायते

90. परिमाणमात्रे का विभक्तिर्भवति?

(A) संबोधनप्रथमा
(B) प्रथमा
(C) द्वितीया
(D) सप्तमी
(E) उत्तरं न ज्ञायते

91. अधिकारत्वबोधकः स्वरः अस्ति

(A) अनुदात्तः
(B) प्रचयः
(C) उदात्तः
(D) स्वरितः
(E) उत्तरं न ज्ञायते

92. खरि अवसाने च परे रेफस्य —————— भवति

(A) रुत्वम्
(B) यत्वम्
(C) विसर्गः
(D) कुत्वम्
(E) उत्तरं न ज्ञायते

93. सुमित्रायाः अपत्यं पुमान्

(A) सौमित्रेयः
(B) सौमित्रः
(C) सुमित्रः
(D) सौमित्रिः
(E) उत्तरं न ज्ञायते

94. 'पौषी पौर्णमासी' – अस्यार्थः

(A) पुष्येण नक्षत्रेण युक्ता पौर्णमासी

(B) पौषमासस्य पौर्णमासी

(C) पुष्टिमती पूर्णिमा

(D) पोषणहेतुः पौर्णमासी

(E) उत्तरं न ज्ञायते

95. 'आत्रेयः' इत्यत्र ढक् प्रत्ययविधायकं सूत्रम्

(A) स्त्रीभ्यो ढक्

(B) टूयचः

(C) इतश्चानिञः

(D) नद्यादिभ्यो ढक्

(E) उत्तरं न ज्ञायते

96. व्याकरणमधीते वेद वा

(A) व्याकरणः

(B) वैयाकरणिः

(C) वैयाकरणः

(D) वैयाकरणी

(E) उत्तरं न ज्ञायते

97. प्रत्ययादेः फकारस्य कः आदेशः भवति?

(A) एय्

(B) आयन्

(C) ईन्

(D) इय्

(E) उत्तरं न ज्ञायते

98. "समर्थानां प्रथमाद्वा" इदं पदत्रयम् अधिक्रियते

(A) प्राग्दिशः इति यावत्

(B) तद्धिताः इति यावत्

(C) स्त्रियाम् इति यावत्

(D) एको गोत्रे इति यावत्

(E) उत्तरं न ज्ञायते

99. पैतृकम् इत्यत्र कः तद्धितप्रत्ययः भवति ?

(A) ठञ्
(B) ठक्
(C) वुञ्
(D) ण्वुल्
(E) उत्तरं न ज्ञायते

100. 'ईहा' इत्यत्र अप्रत्ययविधायकं सूत्रं किम् ?

(A) अ प्रत्ययात्
(B) गुरोश्चहलः
(C) आतश्चोपसर्गे
(D) ण्यासश्रन्थो युच्
(E) उत्तरं न ज्ञायते

101. महाभारत कथा द्वितीयघट्टे [II stage] कति श्लोकैः वितस्तार – इति विमर्शकः कथयति ?

(A) 23,000 श्लोकैः
(B) 26,000 श्लोकैः
(C) 19,000 श्लोकैः
(D) 1,00,000 श्लोकैः
(E) उत्तरं न ज्ञायते

102. कर्दमदेवहूत्योः अनुग्रहार्थं विष्णुः केन रूपेण प्रादुर्बभूव ?

(A) कपिलरूपेण
(B) दत्तात्रेयरूपेण
(C) शिंशुमाररूपेण
(D) वामनरूपेण
(E) उत्तरं न ज्ञायते

103. महाभारतम् कदा निर्मितं – इति Monier Williams महोदयः उवाच ?

(A) B.C. 150
(B) B.C. 180
(C) B.C. 200
(D) B.C. 107
(E) उत्तरं न ज्ञायते

104. दानपत्रमतिक्रम्य यदपात्रे प्रदीयते। तद्दत्तं गामतिक्रम्य गर्दभस्य एवाहिकम्।। कुतः उद्धृतमस्ति?

(A) विष्णुपुराणात्

(B) भागवतपुराणात्

(C) स्कन्दपुराणात्

(D) वायुपुराणात्

(E) उत्तरं न ज्ञायते

105. सम्प्रति कति उपपुराणाणि सन्ति?

(A) 16

(B) 22

(C) 42

(D) 30

(E) उत्तरं न ज्ञायते

106. पद्मपुराणः कति खण्डेषु विभक्तमस्ति -

(A) द्वि

(B) त्रि

(C) पञ्च

(D) चतुः

(E) उत्तरं न ज्ञायते

107. पद्मपुराणस्य वचनमिदम् -

(A) अवश्यम्भाव्यचिन्तनीयः समागमो भवति।

(B) न दया सदृशं दानं न दया सदृशं तपः।

(C) अम्बगर्भो हि जीमूतश्चातकैरभिनन्द्यते।

(D) वर्जयन्ति नरा दूरान्नदीपंकमिव द्विपाः।।

(E) उत्तरं न ज्ञायते

108. जनकराजस्य अतुजस्य नाम किम्?

(A) कुशद्विजः।

(B) कुशाद्वजः।

(C) कुशिद्वजः।

(D) कुशद्वजः।

(E) उत्तरं न ज्ञायते

109. रामायणाधारितं महाकाव्य मस्ति -

(A) शिशुपालवधम्।
(B) प्रतिमानाटकम्।
(C) रघुवंशम्।
(D) कुमारसंभवम्।
(E) उत्तरं न ज्ञायते

110. पञ्चशतसर्गात्मकं काव्यमस्ति -

(A) महाभारतम्।
(B) नैषधीयचरितम्।
(C) रामायणम्।
(D) बालरामायणम्।
(E) उत्तरं न ज्ञायते

111. पतिव्रतानां नाकस्मात् वतल्यश्रूणि राघव। कुतः उद्धतास्ति -

(A) विष्णुपुराणात्।
(B) रामायणात्।
(C) महाभारतात्।
(D) बालरामायणात्।
(E) उत्तरं न ज्ञायते

112. पद्मपुराणे कति पद्यानि भवान्ति।

(A) 58000 पद्यानि
(B) 53000 पद्यानि
(C) 52000 पद्यानि
(D) 55000 पद्यानि
(E) उत्तरं न ज्ञायते

113. भागवतपुराणे कति स्कन्धाः सन्ति?

(A) द्वादश
(B) अष्टादश
(C) दश
(D) पञ्चदश
(E) उत्तरं न ज्ञायते

114. कः समग्ररामायणश्रवणेन शापान्मोचितः – इति कल्हणः कथयति?

(A) मारीयो नाम राक्षसः
(B) नहुषः नाम राजा
(C) दामोदरो नाम राजा
(D) दूषणो नाम राक्षसः
(E) उत्तरं न ज्ञायते

115. विश्वरूपदर्शनं गीतायां कस्मिन्न – ध्याये अस्ति?

(A) द्वितीये
(B) पञ्चमे
(C) दशमे
(D) एकादशे
(E) उत्तरं न ज्ञायते

116. महाभारते को रसः अङ्गी भवति

(A) वीरः
(B) करुणः
(C) शान्तः
(D) श्रृङ्गारः
(E) उत्तरं न ज्ञायते

117. "गङ्गावतरणं" – श्रीमद्वाल्मीकिरामायणस्य कस्मिन् काण्डे वर्णितं?

(A) बालकाण्डे
(B) सुन्दरकाण्डे
(C) उत्तरकाण्डे
(D) युद्धकाण्डे
(E) उत्तरं न ज्ञायते

118. सा भार्या या प्रियं ब्रते स पुत्रो यत्र निवृतिः।

(A) विष्णुपुराणात्।
(B) बालरामायणात्।
(C) महाभारतात्।
(D) रामायणात्।
(E) उत्तरं न ज्ञायते

119. शकुन्तलोपाख्यानम् कस्मिन् पर्वणि दृश्यते -

(A) सभापर्व
(B) आदिपर्व
(C) उद्योगपर्व
(D) द्रोणपर्व
(E) उत्तरं न ज्ञायते

120. जयाख्यं काव्यमस्ति -

(A) रामायणम्।
(B) नैषधम्।
(C) भट्टिकाव्यम्।
(D) महाभारतम्।
(E) उत्तरं न ज्ञायते

121. भागवतकथासङ्ग्रहः कस्मिन् स्तोत्रकाव्ये अस्ति

(A) गीतगोविन्दे
(B) मुकुन्दस्तवे
(C) यादवाभ्युदये
(D) नारायणीये
(E) उत्तरं न ज्ञायते

122. क्षेमेन्द्रः कस्य शिष्यावेन आत्मानं स्मरति

(A) जगन्नाथपण्डितस्य
(B) मम्मटस्य
(C) अभिनवगुप्तस्य
(D) प्रकाशेन्द्रस्य
(E) उत्तरं न ज्ञायते

123. करुणालहरी अस्य कृतिरस्ति

(A) जयदेवस्य
(B) पण्डितराज जगन्नाथस्य
(C) नीलकण्ठदीश्रितस्य
(D) नारायणतीर्थस्य
(E) उत्तरं न ज्ञायते

124. पादुकासहस्रस्य कर्ता अस्ति

(A) यामुनाचार्यः
(B) वेदान्तदेशिकः
(C) रामानुजाचार्यः
(D) वेङ्कटाध्वरिः
(E) उत्तरं न ज्ञायते

125. अमरूशतकस्य प्रणेता अस्ति

(A) अमरसिंहः
(B) अमरदेवः
(C) अमरुककविः
(D) अमरप्रियकविः
(E) उत्तरं न ज्ञायते

126. क्षेमेन्द्रस्य देशः अस्ति

(A) मगधदेशः
(B) विन्ध्यप्रदेशः
(C) मथुरादेशः
(D) काश्मीरदेशः
(E) उत्तरं न ज्ञायते

127. रामगिर्याश्रमेषु वसन् यक्षः कस्मिन् दिवसे मेघं ददर्श ?

(A) वैशाखस्य प्रथमदिवसे
(B) माधवस्य प्रथमदिवसे
(C) सहस्यस्य प्रथमदिवसे
(D) आषाढस्य प्रथमदिवसे
(E) उत्तरं न ज्ञायते

128. 'तन्त्राख्यायिका' केन रचिता ?

(A) क्षेमेन्द्रेण
(B) विष्णुशर्मणा
(C) पूर्णभद्रेण
(D) सुबन्धुना
(E) उत्तरं न ज्ञायते

129. महाश्वेता - पुण्डरीकोपाख्यानं ———— अत्र वर्तते -

(A) दशकुमार चरिते
(B) हर्षचरिते
(C) कादम्बर्याम्
(D) बृहत्कथायाम्
(E) उत्तरं न ज्ञायते

130. तारापीडस्य राजधानी अस्ति - इयम्

(A) विदिशा
(B) अलका
(C) उज्जयिनी
(D) द्वारावती
(E) उत्तरं न ज्ञायते

131. चम्पूरामायणस्य मङ्गलश्लोकः इत्थमारभ्यते -

(A) तपः स्वाध्यायनिरतम्
(B) लक्ष्मीं तनोतु...
(C) सदा बालरूपाणि
(D) कश्चित् कान्ता...
(E) उत्तरं न ज्ञायते

132. रामः कुतः कौशिकमन्वगात्

(A) पितुः नियोगेन
(B) वसिष्ठस्य नियोगेन
(C) मातुः नियोगेन
(D) विश्वामित्रस्य नियोगेन
(E) उत्तरं न ज्ञायते

133. सुप्तं भीमं दंशखितुं चम्पूभारते कस्य मोक्षणं करोति दुर्योधनः

(A) वृश्चिकस्य
(B) व्याघ्रस्य
(C) सर्पस्य
(D) मकरस्य
(E) उत्तरं न ज्ञायते

134. दण्डिनः कृतिः अस्ति

(A) हर्षचरितम्
(B) दशकुमारचरितम्
(C) बुद्धचरितम्
(D) कादम्बरी
(E) उत्तरं न ज्ञायते

135. कस्यै भूपतिः पायसार्धः प्रथममदिशत्

(A) कौसल्यायै
(B) कैकेय्यै
(C) सुमित्रायै
(D) सर्वस्यै
(E) उत्तरं न ज्ञायते

136. कुत्र: विशाल: शाल्मलीतरु: अस्ति इति विष्णुशर्मा कथयति?

(A) कावेरीतीरे
(B) यमुनातीरे
(C) नर्मदातीरे
(D) गोदावरीतीरे
(E) उत्तरं न ज्ञायते

137. गाथासप्तशती अनेन संकलिता अस्ति

(A) केशवदाससंकलिता
(B) श्रीधरदाससंकलिता
(C) सातवाहनसंकलिता
(D) जीमूतवाहनसंकलिता
(E) उत्तरं न ज्ञायते

138. हितोपदेशस्य ग्रन्थकर्तु: नाम अस्ति?

(A) श्रीनारायणपण्डित:
(B) जगन्नाथ पण्डित:
(C) सोमदत्त:
(D) श्रीहर्ष:
(E) उत्तरं न ज्ञायते

139. पञ्चतन्त्रस्य कर्त्ता अस्ति?

(A) सोमदेव:
(B) विष्णुशर्मा
(C) भार्गवशर्मा
(D) सोमशर्मा
(E) उत्तरं न ज्ञायते

140. विष्णुशर्मा निर्गन्धा इव किंशुका: इति कान् अधिकृत्य कथयति?

(A) गुणहीनान्
(B) विद्याहीनान्
(C) शीलहीनान्
(D) अर्थहीनान्
(E) उत्तरं न ज्ञायते

141. वृक्षा: सुखदु:खसमन्विता: इति केन उक्तम्?

(A) मनुना
(B) व्यासेन
(C) वाल्मीकिना
(D) कालिदासेन
(E) उत्तरं न ज्ञायते

142. लौकिकछन्द: कतिप्रकारं भवति?

(A) द्विप्रकारम्
(B) त्रिप्रकारम्
(C) पञ्चप्रकारम्
(D) सप्तप्रकारम्
(E) उत्तरं न ज्ञायते

143. कामसूत्रस्य जयमंगला टीकाकार: क:?

(A) यशोधर:
(B) पयोधर:
(C) धनुर्धर:
(D) शंखधर:
(E) उत्तरं न ज्ञायते

144. हव्यवाहन : - इति कस्य नाम?

(A) वरुणस्य
(B) शिवस्य
(C) अग्ने:
(D) सोमस्य
(E) उत्तरं न ज्ञायते

145. भूपरिधि: (Radius of Earth) कतियोजनात्मका अस्ति?

(A) 400
(B) 1000
(C) 500
(D) 800
(E) उत्तरं न ज्ञायते

146. ज्योतिषे त्रिप्रश्नेषु के ग्राह्या:।

(A) दिक्, देश, काला:
(B) सूर्योदय:, मध्याह्न:, सूर्यास्त:
(C) लग्नोदय:, राश्युदय:, ग्रहोदय:
(D) उपरि कथिता: सर्वे ग्राह्या:
(E) उत्तरं न ज्ञायते

147. ब्राह्मस्फुट सिद्धान्ते 24 अध्याया:, 1008 श्लोका: सन्ति?

(A) सत्यमिदं वचनम्
(B) असत्यमिदं वचनम्
(C) सत्यासत्यमिदं वचनम्
(D) सर्वथा असत्यमस्ति
(E) उत्तरं न ज्ञायते

148. युगरवि भगणा: ख्युधृ----

अत्र आर्यभटोक्त संख्या पद्धति अनुसारेण ''ख्युधृ'' इति पदेन अधोंकिता का संख्या भवति?

(A) 4,32,000
(B) 43,200
(C) 43,20,000
(D) 4,320
(E) उत्तरं न ज्ञायते

149. योजनानि शतान्यष्टौ, भूकणौ द्विगुणानि तु।

तद्धवर्गतो दशगुणात्, पदं भूपरिधिर्भवेत्।।

अस्मिन् श्लोके आचार्यः किं वर्णयति?

(A) भूकर्णस्य मानम्?

(B) परिधि मानम्?

(C) योजनमानम्?

(D) '$\pi$' (पाई) इत्यस्य मानम्?

(E) उत्तरं न ज्ञायते

150. आर्यभटीयस्य कर्त्ता कः अस्ति?

(A) ब्रह्मगुप्तः

(B) भास्करः

(C) सुधाकरः

(D) आर्यभटः

(E) उत्तरं न ज्ञायते

151. चित्रशास्त्रविषयान् समराङ्गणसूत्रधार इति ग्रन्थे कः विवरणं कृतवान्?

(A) शूद्रकः

(B) भोजराजः

(C) अङ्गराजः

(D) कलिङ्गराजः

(E) उत्तरं न ज्ञायते

152. कः विग्रहवान् धर्मः?

(A) कृष्णः

(B) रामः

(C) शिवः

(D) षण्मुखः

(E) उत्तरं न ज्ञायते

153. श्रृङ्गार-हास्य-शान्ताख्या लेखनीया ———— ते। पूरयत।

(A) मठेषु

(B) गुहासु

(C) गृहेषु

(D) मनस्सु

(E) उत्तरं न ज्ञायते

154. अर्थशास्त्रस्य प्रणेता कः?

(A) चाणक्यः

(B) भास्करः

(C) आर्यभट्टः

(D) विश्वकर्मा

(E) उत्तरं न ज्ञायते

155. PLASTIC SURGERY इत्यस्य जनकः कः अस्ति?

(A) सुश्रुतः

(B) चरकः

(C) सरठः

(D) जरठः

(E) उत्तरं न ज्ञायते

156. येन शास्त्रं च शस्त्रं च नन्द राज गता च भूः।

अमर्षेणोद् धृतान्याशु तेन शास्त्रमिदं कृतम्।।

अनेन नन्दवंशस्य समुच्छेत्ता कः?

(A) कौटिल्यः

(B) राक्षसः

(C) कात्यायनः

(D) चन्द्रगुप्तमौर्यः

(E) उत्तरं न ज्ञायते

157. भूलोके प्रथम: कायकल्प: कस्य जात: अस्ति?

(A) भार्गवस्य
(B) ब्रह्मण:
(C) गजाननस्य
(D) च्यवनस्य
(E) उत्तरं न ज्ञायते

158. शल्य तन्त्रस्य आदिय प्रणेता क: अस्ति?

(A) चरक:
(B) सरठ:
(C) जरठ:
(D) सुश्रुत:
(E) उत्तरं न ज्ञायते

159. आयुर्वेदस्य कति अंगानि सन्ति?

(A) 8
(B) 3
(C) 5
(D) 12
(E) उत्तरं न ज्ञायते

160. आयुर्वेदस्य मूलप्रवर्तकः क: अस्ति?

(A) ब्रह्मा
(B) विष्णु:
(C) महेश:
(D) त्रिमूर्ति:
(E) उत्तरं न ज्ञायते

161. 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' —————— अत्र कस्य विषये उच्यते।

(A) नान्दी
(B) प्रस्तावना
(C) भरतवाक्यम्
(D) विष्कम्भक:
(E) उत्तरं न ज्ञायते

162. किरातार्जुनीयाख्यस्य मद्यकाव्यस्य नायिका अस्ति ?

(A) सुभद्रा
(B) द्रौपदी
(C) हिडिम्बा
(D) कुन्ती
(E) उत्तरं न ज्ञायते

163. धर्मशमाभ्युदयं कस्य कृतिः वर्तते ?

(A) भट्टरत्नाकरः
(B) भट्टारहरिश्चन्द्रः
(C) भट्टबाणः
(D) भट्टनायकः
(E) उत्तरं न ज्ञायते

164. नीलकण्ठदीक्षितस्य कृतिः वर्तते

(A) युधिष्ठिरविजयत्
(B) गङ्गावतरणम्
(C) जानकीपरिणयम्
(D) रघुनाथाभ्युदयम्
(E) उत्तरं न ज्ञायते

165. राघवपाण्डवीयम् कस्य कृतिः ?

(A) धनराजः
(B) यतिराजः
(C) कविराजः
(D) नलराजः
(E) उत्तरं न ज्ञायते

166. दमयन्तीम् अभिलक्ष्य नलस्य गुणगानं करोति ——————।

(A) दमयन्त्याः सखी
(B) नलस्य दूतः
(C) हंसः
(D) बकः
(E) उत्तरं न ज्ञायते

167. "श्री" शब्देन वस्तुनिर्देशात्मकः मङ्गलश्लोकः कस्मिन् महाकाव्ये दृश्यते ?

(A) रघुवंशम्
(B) कुमारसम्भवम्
(C) शिशुपालवधम्
(D) नैषधीयचरितम्
(E) उत्तरं न ज्ञायते

168. 'नवसाहसाङ्कचरितम्' कस्य कृतिः वर्तते ?

(A) चन्द्रगुप्तः
(B) समुद्रगुप्तः
(C) पद्मगुप्तः
(D) न कश्चित्
(E) उत्तरं न ज्ञायते

169. अश्वघोषः कस्य राज्ञः सभाङ्गणमलञ्चकार -

(A) विक्रमादित्यस्य
(B) अशोकस्य
(C) कनिष्कराजस्य
(D) धम्मिल्लस्य
(E) उत्तरं न ज्ञायते

170. परिमलकालिदासः इति कः आहूयते ?

(A) पद्मगुप्तः
(B) पद्मदासः
(C) पद्मपरिमलः
(D) पद्मपादः
(E) उत्तरं न ज्ञायते

171. शब्दविद्येव ना भाति राजनीतिरपस्पशा - कास्मीन् काव्ये भवति ?

(A) किरातार्जुनीये
(B) माघकाव्ये
(C) राजनीतिकाव्ये
(D) भट्टिकाव्ये
(E) उत्तरं न ज्ञायते

172. कुमारदासमहाकविः कस्मिन् देशे जातः?

(A) गूर्जरदेशे।

(B) चीनदेशे।

(C) सिंहलदेशे।

(D) पारसिकदेशे।

(E) उत्तरं न ज्ञायते

173. सेतुबन्धकाव्यस्य कर्ता कः?

(A) प्रवरसेनः

(B) भोजराजः

(C) भवभूतिः

(D) भारविः

(E) उत्तरं न ज्ञायते

174. यादवराघवीयं कस्य कृतिः

(A) वेदान्तदेशिकः

(B) क्षेमेन्द्रः

(C) जयरथः

(D) वेङ्कटाध्वरिः

(E) उत्तरं न ज्ञायते

175. शिशुपालवधमहाकाव्यस्य कर्ता कः?

(A) श्रीकृष्णः

(B) श्रीहर्षः

(C) भारविः

(D) माघः

(E) उत्तरं न ज्ञायते

176. नन्दिन्याः सेवायां संलग्नः नृपः कः?

(A) अजः

(B) रघुः

(C) दिलीपः

(D) रामः

(E) उत्तरं न ज्ञायते

177. सर् विल्लियम् जोन्स् कालिदासं कस्मिन् काले निर्दिष्टवान्?

(A) 100 B.C.
(B) 400 A.D.
(C) 600 A.D.
(D) 200 B.C.
(E) उत्तरं न ज्ञायते

178. "अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः" इत्यत्र कस्यवंशस्य उल्लेखः दृश्यते?

(A) हरिवंशः
(B) भृगुवंश
(C) यदुवंश
(D) रघुवंशः
(E) उत्तरं न ज्ञायते

179. "अस्ति" इति पदेन किं मधकाव्यं प्रारभ्यते?

(A) शिशुपालवधम्
(B) रघुवंशम्
(C) कुमारसम्भवम्
(D) किरातार्जुनीयम्
(E) उत्तरं न ज्ञायते

180. "मन्दः कवियशः प्रार्थी" कः भवति?

(A) अग्निमित्रः
(B) कालिदासः
(C) रघुवीरः
(D) दिलीपः
(E) उत्तरं न ज्ञायते

181. रससंप्रदायप्रवर्तकाचार्यः कः?

(A) दण्डी
(B) कालिदासः
(C) क्षेमेन्द्रः
(D) भरतः
(E) उत्तरं न ज्ञायते

182. ध्वन्यात्मभूतः रसः इति आनन्दवर्धनः अभिप्रेति।

(A) श्रृङ्गारः
(B) करुणः
(C) वीरः
(D) त्रयोऽपि
(E) उत्तरं न ज्ञायते

183. काव्यशास्त्रसंप्रदायेषु रससंप्रदायप्रवर्तकः प्रथमः कः?

(A) जगन्नाथः।
(B) भरतमुनिः।
(C) आनन्दवर्धनः।
(D) महिमभट्टः।
(E) उत्तरं न ज्ञायते

184. नाट्यशास्त्रस्य "अभिनवभारती" - नाम व्याख्यारचयितृनाम निर्दिशत –

(A) भरताचार्यः
(B) अभिनवकालिदासः
(C) अभिनवगुप्तः
(D) भट्टतौतः
(E) उत्तरं न ज्ञायते

185. कस्मिन् ग्रन्थे प्रथमाधिकरणस्य कतिरहस्यं इति नाम भवति?

(A) सरस्वतीकण्ठाभरणे
(B) वामनालङ्कारे
(C) काव्यालोकरहस्ये
(D) काव्यमीमांसा ग्रन्थे
(E) उत्तरं न ज्ञायते

186. प्रतीयमानार्थः कैः न वेद्यते?

(A) काव्यार्थतत्वुज्ञैः
(B) शब्दार्थ शासनज्ञान मात्रयुक्तैः
(C) नैयासिकैः
(D) सामान्यैः
(E) उत्तरं न ज्ञायते

187. काव्यरचनार्थं कुतः पदार्थनिश्चयः स्वीकर्तव्यः ?

(A) इतरकाव्यतः

(B) अभिधानकोशतः

(C) व्याकरणशास्त्रतः

(D) न्यायशास्त्रतः

(E) उत्तरं न ज्ञायते

188. समग्रगुणगुम्फिता का – इति वामनेन प्रोच्यते ?

(A) गौडी

(B) पाञ्चाली

(C) वैदर्भी

(D) ध्वनिः

(E) उत्तरं न ज्ञायते

189. दण्डलाचार्यस्य ग्रन्थाः कति ?

(A) 4 – काव्यादर्शः– दशकुमारचरितं – काव्यटीका – काव्यालङ्कारग्रन्थः च

(B) 2 – काव्यादर्शः – दशकुमारचरितम् च

(C) 1 – काव्यादर्शः

(D) 3 – काव्यादर्शः – दशकुमारचरितं – छन्दोविच्छित्तिः च

(E) उत्तरं न ज्ञायते

190. रसालङ्कारनिर्णये सर्वप्राचीनं शास्त्रं निर्दिशत –

(A) अर्थशास्त्रम्

(B) पूर्वमीमांसाशास्त्रम्

(C) भरतनाट्यशास्त्रम्

(D) सांख्यशास्त्रम्

(E) उत्तरं न ज्ञायते

191. स्वीये 'औचित्यविचारचर्चाग्रन्थे' क्षेमेन्द्रः कं 'कुन्तेश्वदौत्य' मिति ग्रन्थस्य कर्तारं मन्यते ?

(A) कालिदासं

(B) भारविं

(C) विश्वनाथं

(D) बल्लालसेनं

(E) उत्तरं न ज्ञायते

192. भामिनीविलास – ग्रन्थ कर्ता कः ?

(A) राजशेखरः
(B) जयदेवः
(C) जगन्नाथः
(D) रामभद्रदीक्षितः
(E) उत्तरं न ज्ञायते

193. 'पश्च नीलोत्पलद्वन्द्वात् निस्सरन्ति शिताः शराः' – अत्रत्यः अलङ्कारः कः ?

(A) अतिशयोक्तिः
(B) रूपकम्
(C) व्यतिरेकः
(D) विरोधाभासः
(E) उत्तरं न ज्ञायते

194. तस्यार्थः तत्पदैस्तेन नाट्यवेदं संक्षिपानि – इति आचार्यः कस्मिन् ग्रन्थे कथयति ?

(A) नाट्यशास्त्रे
(B) दशरूपके
(C) भावप्रकाशे
(D) सामवेदभाष्ये
(E) उत्तरं न ज्ञायते

195. वाक्यार्थ – अभिनयात्मकम् किमिति दशरूपककारेण प्रोच्यते ?

(A) नाट्यम्
(B) नृत्यम्
(C) नृत्तम्
(D) मार्गः
(E) उत्तरं न ज्ञायते

196. साहित्यमीमांसा – ग्रन्थकारः अयम् –

(A) राजशेखरः
(B) रुय्यकः
(C) उद्भटः
(D) कैयटः
(E) उत्तरं न ज्ञायते

197. "धर्मोऽर्थ इव पूर्णश्रीः अर्थो धर्म इव त्वस्ति" – अत्र कः अलङ्कार

(A) उपमालङ्कार
(B) उपमेयोपमालङ्कारः
(C) अनन्वयः
(D) विभावना
(E) उत्तरं न ज्ञायते

198. "इदमुत्तममतिशयिनि व्यङ्गये वाच्यात् ध्वनिः बुधैः कथितः" – इति लक्षणे बुध – शब्देन के सूच्यन्ते ?

(A) काव्यमर्मज्ञाः
(B) वैयाकरणाः
(C) अभिनवगुप्तादिप्रवराः
(D) मीमांसकाः
(E) उत्तरं न ज्ञायते

199. कान्तासंमिततया प्रोच्यमानोपदेशस्वरूप कथं भवनीति मम्मटाचार्यः कथयति – ?

(A) काव्यग्रन्थाः पठनीयाः तैर्बुद्धिविकासः
(B) सदा काव्यं श्राव्यम्
(C) रामादिवत् वर्तितव्यम् न तु रावणादिवत्
(D) जीवने सौख्यमेव मुख्यम्
(E) उत्तरं न ज्ञायते

200. ध्वनेः विकारः कः – इति व्यपदिश्यते ?

(A) व्यञ्जनाव्यापारः
(B) लक्षणाव्यापारः
(C) काकुः
(D) अभिधामूलध्वनिः
(E) उत्तरं न ज्ञायते